## चवायोगे प्रथमा । (५९/३९६६)

अगतेः इति पूर्वसूत्रे च अनुकृष्टम् इत्यत्र नानुवर्तते । [1]च, वा इत्येताभ्यां योगे प्रथमा तिङविभक्तिर्नानुदात्ता भवति । [2]गर्दभाँश्च कालयति, वीणां च वादयति । [3]गर्दभान् वा कालयति, वीणां वा वादयति । योगग्रहणं [4]पूर्वाभ्यामपि योगे [5]निघातप्रतिषेधो यथा स्यात् इति । प्रथमाग्रहणं द्वितीयादेः तिङन्तस्य मा भूत् इति[6] । चवायोगो हि [7]द्विसमुच्चये विकल्पे [8]च सति भवति, स च अनेकस्य धर्म [9]इति ॥

## हेति क्षियायाम् । (६०/३९६७)

[10]ह इत्यनेन युक्ता प्रथमा तिङविभक्तिः नानुदात्ता भवति क्षियायां गम्यमानायाम् । [11]क्षिया धर्मव्यतिक्रमः, आचारभेदः । स्वयं ह रथेन याति३, उपाध्यायं पदातिं गमयति । स्वयं ह ओदनं भुङ्क्ते३, उपाध्यायं सक्तून् पाययति । [12]प्रथमस्य तिङन्तस्यात्र निघातः प्रतिषिध्यते । 'क्षियाशीःप्रैषेषु तिङाकाङ्क्षम्' (८.२.१०४/३६२३) इति च प्लुतो [13]भवति ॥

## अहेति विनियोगे च । (६१/३९६८)

अह इत्यनेन युक्ता प्रथमा तिङविभक्तिर्नानुदात्ता भवति विनियोगे गम्यमाने, चशब्दाद् क्षियायां च । नानाप्रयोजनो नियोगो विनियोगः । त्वमह ग्रामं गच्छ । त्वमह अरण्यं गच्छ । क्षियायाम् – स्वयमह रथेन याति३, उपाध्यायं पदातिं गमयति । स्वयमह ओदनं भुङ्क्ते३, उपाध्यायं सक्तून् पाययति । पूर्ववन्निघातप्रतिषेधः, प्लुतश्च ॥

## चाहलोप एवेत्यवधारणम् । (६२/३९६९)

चलोपे अहलोपे[14] प्रथमा तिङविभक्तिः नानुदात्ता भवति । एव इति एतच्चेदवधारणार्थं प्रयुज्यते, क्व [15]चास्य लोपः ? यत्र गम्यते चार्थः, न च प्रयुज्यते,[16] तत्र लोपः । तत्र चशब्दः समुच्चयार्थः, अहशब्दः केवलार्थः इति समानकर्तृके चलोपः, नानाकर्तृके अहलोपः । चलोपे–देवदत्त एव ग्रामं गच्छतु, स देवदत्त एवारण्यं गच्छतु । ग्रामं चारण्यं च गच्छतु इत्यर्थः । अहलोपे – देवदत्त एव ग्रामं गच्छतु, यज्ञदत्त एवारण्यं गच्छतु । ग्रामं केवलम्, अरण्यं केवलमित्यर्थः । अवधारणम् इति किम् ? [17]देवदत्तः क्वेव भोक्ष्यते । अनवक्लृप्तावयमेवशब्दः । न क्व चिद् भोक्ष्यते इत्यर्थः[18] । 'एवे चानियोगे' (वा. ६८६) इति [19]पररूपम् ॥

## चादिलोपे विभाषा । (६३/३९७०)

चादयः, 'न चवाहाहैवयुक्ते' (८.१.२४/४०८) इति [20]सूत्रनिर्दिष्टा गृह्यन्ते । तेषां लोपे प्रथमा तिङविभक्तिः नानुदात्ता

---

1. चवाभ्याम् योगे इ. 2. च – इत्यधिकम् इ. 3. वा – इत्यधिकम् इ. 4. पूर्वसूत्राभ्यामपि क, पूर्वभूताभ्याम् इ. 5. निघात नास्ति इ. 6. तस्यापि योग इत्येव इत्यधिकम् ड. 7. द्वि नास्ति क. इ. ड. 8. वा ब.ड. 9. इति नास्ति ब. क. इ. ड. 10. प्रथमा इति वर्तते इत्यधिकम् ब. 11. वाक्यमिदं नास्ति ह. 12. प्रथमान्तस्य ह. 13. भवति नास्ति ह. 14. चशब्दः इत्यधिकम् ब. 15. चानयोः ह. 16 चशब्दः इत्यधिकम् ह. 17. देवदत्त क्वेव भोक्ष्यसे ब. 18. न किञ्चिदध्येष्यते इत्यधिकम् ड. 19. पररूपत्वम् ब. 20. सूत्रे ये निर्दिष्टा ते एव क.इ, अत्र ये निर्दिष्टा ह.